# Shri Dharmanandana Ashtakam

# શ્રીધર્મનન્દનાષ્ટકમ્

## Document Information

Text title : Shri Dharmanandana Ashtakam

File name : dharmanandanAShTakam.itx

Category : vishhnu, svAminArAyaNa, krishna, aShTaka

Location : doc_vishhnu

Author : achintyAnandabrahmachArI

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

Shri Dharmanandana Ashtakam

# શ્રીધર્મનન્દનાષ્ટકમ્

મુક્તાનાં સદસિ સદા વિરાજમાનં
પૂર્ણેન્દુ-પ્રવરમુખાબ્જ-પત્રનેત્રમ્ ।
મન્દાર-સ્થલરુહ-કુન્દસારહારં
ધર્માઙ્ગ-પ્રભવમહં હરિં પ્રપદ્યે ॥ ૧॥

અભોજ-ધ્વજકલશાં-કુશોર્ધ્વરેખા
ગોપાદ-પ્રમુખસુલક્ષ્મ-પાદપદ્મમ્ ।
સામોદ-ભ્રમરવિગુઞ્જિતા-વચૂલં
ધર્માઙ્ગ-પ્રભવમહં હરિં પ્રપદ્યે ॥ ૨॥

ભક્તેભ્યો વિહિતસબીજ-સાઙ્ખ્યયોગં
પ્રાવારપ્રચલિત-કઞ્ચુકાભિરામમ્ ।
શ્રીખણ્ડ-પ્રવર-તમાલપત્ર-મીશં
ધર્માઙ્ગ-પ્રભવમહં હરિં પ્રપદ્યે ॥ ૩॥

વિદ્યોતન્મણિમય-હેમકુણ્ડલ-શ્રી-
કર્ણાગ્રોત્તમ-કુસુમા-વતંસરમ્યમ્ ।
શ્રીવત્સોલ્લસિત-ભુજાન્તરં સદીશં
ધર્માઙ્ગ-પ્રભવમહં હરિં પ્રપદ્યે ॥ ૪॥

સંસાર-પ્રશમન-કારણ-પ્રતાપં
બિભ્રાણં સુરુચિર મૌક્તિકીઞ્ચ માલામ્ ।
હસ્તાગ્રે સુલલિત-માલિકાં દધાનં
ધર્માઙ્ગ-પ્રભવમહં હરિં પ્રપદ્યે ॥ ૫॥

શાન્તાનાં વિદલિત-માનમત્સરાણાં
કામાદિપ્રબલ-વિપક્ષનિર્જયાનામ્ ।
સાધૂના-મનિશ-મવેક્ષણીય-રૂપં
ધર્માઙ્ગ-પ્રભવમહં હરિં પ્રપદ્યે ॥ ૬॥

વેદાન્તૈ-રુદિત-સુકીર્તિ-મામકામં
જુષ્ટાઙ્ઘ્રિં વિજિતવિદૂષણૈર્મુનિન્દ્રૈઃ ।
બ્રહ્માણ્ડ-સ્થપતિ-સુરેશ્વરૈકનાથં
ધર્માઙ્ગ-પ્રભવમહં હરિં પ્રપદ્યે ॥ ૭॥

રમ્યાણાં વિમલ-સુવર્ણભૂષણાનાં
શ્રીમત્તામવયવ-શોભાયા દધાનમ્ ।
ધર્માન્ત-પ્રભાવ-નવીન-મેઘનીલં
ધર્માઙ્ગ-પ્રભવમહં હરિં પ્રપદ્યે ॥ ૮॥

ઇતિ શ્રી અચિન્ત્યાનન્દબ્રહ્મચારીવિરચિતં શ્રીધર્મનન્દનાષ્ટકં સમ્પૂર્ણમ્ ।

---

*Shri Dharmanandana Ashtakam*

pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*